**EB**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) – बहिस्थ

**परीक्षा : जून–जुलै–२०२२**

**सत्र ४ थे**

**विषय: महाकाव्य – II (किरातार्जुनीय आणि शिशुपालवध)** (EB–४४०३)

| **दिनांक : २७/०६/२०२२** | **गुण : ८०** | **वेळ : स. १०.०० ते १.००** |
|---|---|---|

**शिशुपालवध**

**प्र. १. चतुर्णामनुवादं ससंदर्भं स्वभाषया लिखत।** **(२०)**

१. तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः। अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे।।

२. विधाय वैरं सामर्षे नरौऽरौ य उदासते। प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्।।

३. तुल्येऽपराधे स्वर्भानुः भानुमन्तं चिरेण यत्। हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्।।

४. सार्धमुद्धवसीरिभ्याम् अथासावासदत्सदः। गुरुकाव्यानुगां विभ्रत् चान्द्रीमभिनभः श्रियम्।।

५) न दूये सात्वतीसूनुः यन्मह्यमपराध्यति। यत्तु दन्दह्यते लोकम् अदो दुःखाकरोति माम्।।

**प्र.२. अ) त्रयाणां ससंदर्भं स्पष्टीकरणं कुरुत।** **(१५)**

१. क्रिया केवलमुत्तरम्। २. सुहृदो बिमनीकृताः। ३. संदिग्धे कार्यवस्तुनि।
४. सर्वः स्वार्थं समीहते। ५. प्रथमेन त्वयारिणा।

**ब) एका टिप्पणी लेख्या।** **(०५)**

१. माघे सन्ति त्रयो गुणाः। २. समूहः स महीमृताम्।
३. वामनीभूतभूरुहः।

**किरातार्जुनीयम्**

**प्र. ३. चतुर्णामनुवादं ससन्दर्भं लिखत।** **(२०)**

१. कृतप्रमाणस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।

२. स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम्।।

३. इमामहं वेद न तावकीं धियं विचित्ररुपाः खलु चित्तवृत्तयः।
विचिन्तगन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः।।

४. स किंसखा साधु न शास्ति योऽधिपं हितान्न यः सं शृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।।

५. अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः।।

**प्र.४. अ) त्रयाणां ससंदर्भं स्पष्टीकरणं कुरुत।** **(१५)**

१. व्रजन्ति ते मूढधियः पराभवम् २. हितं मनोहारि च दुर्लभं वचः।
३. क्व भूपतीनां चरितं क्व जन्तवः। ४. मतङ्गजेन स्रगिबापवर्जिता।
५. न बांधतेऽस्य त्रिगणः परस्परम्।

**ब) एका टिप्पणी लेख्या।** **(०५)**

१. भारवेरर्थगौरवम् २. धर्मराजस्याधिक्षेपः ३. दुर्योधनस्य शासनपद्धतिः।

-----------